# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा नवम्बर्-दिसम्बर् - २०१६

कक्षा - आचार्यद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** - २ गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड** - C.C-5.3.7 समयः - ११:०० तः २:००

दिनाङ्कः - २५.११.२०१६ सन्दर्भग्रन्थः - व्याकरणमहाभाष्यम्

---

प्रथमान्वितिः (युनिट- १)

प्रश्नः १ कयोश्चित् द्वयोः व्याख्यानं विधेयम् (८)

क. किं पुनः 'समर्थः पदविधिः' इति सूत्रमिदमधिकारसूत्रमाहोस्वित् परिभाषासूत्रम्

ख. संख्याविशेषोऽव्यक्ताभिधानमुपसर्जनं विशेणं च योगः।

ग. नानाकारकाभिधानयुष्मदस्मदादेसप्रतिषेधः

प्रश्नः २ कस्यचिदेकस्य व्याख्यानं विधेयम् (८)

क. राजगवीक्षीरे द्विसमासप्रसङ्गो द्विषष्ठीभावात्।

ख. समानाधिकरणेषूपसङ्ख्यानमसमर्थत्वात्

प्रश्नः ३ द्वयोरेकस्य सामर्थ्यं प्रतिपादयत (२)

क. स्वरसम्मासान्तपुंवद्भावेषु दोषः

ख. अर्थगत्यर्थः शब्दप्रयोगः।

प्रश्नः ४ कयोश्चित् द्वयोः लघूत्तराणि लेख्यानि (२)

क. 'समर्थ'-सूत्रस्य कोऽर्थः?

ख. सामर्थ्यं कतिविधम्?

ग. 'समास'-शब्दस्य का व्युत्पत्तिः?

घ. कतिविधः समासः?

द्वितीयान्वितिः (युनिट- २)

प्रश्नः ५ कयोश्चित् द्वयोः व्याख्यानं विधेयम् (८)

क. अनभिहितस्तु विभक्त्यर्थस्तस्मादनभिहितवचनम्

ख. न वाऽन्यतरेणाऽनभिधानात्।

ग. अनभिहितवच्चनमनर्थकमन्यत्रापि।

प्रश्नः ६ कस्यचिदेकस्य व्याख्यानं कार्यम् (८)

क. समासेनोक्तत्वात् वीप्सायां द्विर्वचनं न भवति

ख. अनभिहिते प्रथमाभावः।

प्रश्नः ७ केषाञ्चित् चतुर्णांलघूत्तराणि लेख्यानि (४)

क. अनभिहितशब्दस्य कोऽर्थः?

ख. अनभिहिते कर्मणि का विभक्तिः भवति?

ग. तिङ्कृत्तद्धितसमासैः कारकम् उक्तं भवति, तत्र 'क्रियते कटः' इत्येतत् कस्य उदाहरणम्?

घ. समया-योगे का विभक्तिः भवति?

ङ. अन्तरा-योगे का विभक्तिः भवति?

च. कालवाचकात् शब्दात् अत्यन्तसंयोगे का विभक्तिः भवति?

छ. कर्मप्रवचनीयशब्दस्य योगे का विभक्तिः भवति?

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ८ द्वयोरेकस्य व्याख्यानं विधेयम् (४)

क. कर्तृकरणयोस्तृतीया। ख. सहयुक्तेऽप्रधाने।

प्रश्नः ९ कस्यचिदेकस्य विषये भाष्यसम्मता चर्चा विधेया (८)

क. येनाङ्गविकारः। ख. सप्तम्यधिकरणे च।

प्रश्नः १० केषाञ्चित् त्रयाणां लघूत्तराणि लेख्यानि (३)

क. अनुक्ते कर्तरि का विभक्तिः भवति?

ख. 'प्रायेण याज्ञिकाः' इत्यत्र 'प्रायेण' इत्यत्र केन वार्त्तिकेन तृतीया विभक्तिः भवति?

ग. सहयोगे प्रधानाप्रधानयोर्मध्ये कुत्र तृतीया विभक्तिः भवति?

घ. येनाङ्गविकारः इत्यस्मिन् सूत्रे अङ्गशब्दः अङ्गिनः वाचकः अङ्गवाचकः वा?

ङ. इत्थम्भूतलक्षणे इति सूत्रेण का विभक्तिः भवति?

चतुर्थ्यन्वितिः (युनिट - ४)

प्रश्नः ११ कस्यचिदेकस्य सूत्रस्य व्याख्या कार्या (४)

क. षष्ठी शेषे। ख. द्वितीया ब्राह्मणे।

प्रश्नः १२ कस्यचिदेकस्य भाष्यदिशा व्याख्यानं विधेयम् (८)

क. प्रतिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा।

ख. उभयप्राप्तौ कर्मणि।

प्रश्नः १३ केषाञ्चित् त्रयाणां लघूत्तराणि लेख्यानि (३)

क. प्रतिपदिकार्थ-शब्दस्य का व्युत्पत्तिः?

ख. क्तस्य च वर्तमाने इत्यस्य कोऽर्थः?

ग. नलोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रेण कस्याः विभक्तेः निषेधः भवति?

घ. कर्तृकर्मणोः कृति इति सूत्रेण का विभक्तिः विधीयते?

ङ. कृत्यानां कर्तरि वा इति सूत्रेण कर्तरि सप्तमी विभक्तिः भवति, विकल्पेन सप्तम्याः अभावे कर्तरि का विभक्तिः क्रियते?

***